श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णकवि विरचितं

# ॥ श्रीरघुवीरसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरघुवीरसुप्रभातम् ॥

परिणतिपरिशंसी मन्दमन्दं निशाया
    मृदुमधुरनिनादो जृम्भतेऽयं मृदङ्गात्।
करतलपरिमृष्टाद् बन्दिनामागतानां
    रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ 1 ॥

मुहुरविकलगीतैर्मोहयन्निन्द्रियौघं
    श्रुतिपुटविवराभ्यां मन्दमन्तः प्रविश्य।
अयमपहरति द्राङ्मानसं वेणुनादो
    रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ 2 ॥

उदयति निशि यस्मिन् सद्गणो धिक्कृतोऽभूत्
    स तु पतनमुपैष्यत्युन्नतिं धिग् धिगिन्दोः।
प्रभवति हि विभूत्यै सद्गणस्योन्नतिस्ते
    रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ 3 ॥

अयमुदयति गूढः किञ्चिदुच्चैः सरिद्भिः
    श्रयति सपदि भास्वानंशुजालैः परीतः।
हरिहरिदसिताक्ष्याः कङ्कताभां कराब्जे
    रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ 4 ॥

दशशतकरजालं द्राक् प्रसार्यंशुमालि -
    न्यमरदिगसिताक्ष्याश्लेषणायोन्मुखेऽस्मिन्।
कलमिह रचयन्ते गीतमेता विहङ्गा
    रघुकुलजलधीन्दो नाथ ते सुप्रभातम् ॥ 5 ॥

विकचजलजगन्धानाहरन् मन्दवात -
श्चिरमयमवगाह्य स्रोतसि ह्लादिनीनाम्।
शमयति तव देव्याः स्वेदबिन्दून् मुखाब्जे
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ 6॥

जनकनृपतिकन्या पूर्वमेव प्रबुद्धा
कथमपि विरचय्याश्लेषभेदं तवैषा।
रचयति ननु दूरे क्लेशमावीजनात् ते
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ 7॥

तव चरणसरोजद्वन्द्वसंवाहनेन
ह्ययमपि गमयित्वा शर्वरीं निर्निमेषम्।
अरुणनयनकोणः प्राञ्जलिर्वायुसूनू
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ 8॥

कमपि कुलिशपाणेरायुधेनाप्यभेद्यं
रचयसि यदि सेतुं देव संसारसिन्धोः।
तरति सुखमिदानीं सर्व एवात्र लोके
रघुकुलजलधीन्दो नाथ ते सुप्रभातम्॥ 9॥

॥ इति श्रीरघुवीरसुप्रभातं समाप्तम्॥